हनुमत् स्तवन्

प्रनवौं पवनकुमार खल बनपावक ज्ञानघन
जासु हृदय आगार बसहिं राम सर चाप धर १

अतुलितबलधामं हेमशैलाभदेहम्
दनुजवनकृशानुं ज्ञानिनामग्रगण्यम्
सकलगुणनिधानं वानराणामधीशम्
रघुपतिप्रियभक्तं वातजातं नमामि २

गोष्पदीकृतवारीशं मशकीकृतराक्षसम्
रामायणमहामालारत्नं वन्दे अनिलात्मजम् ३

अञ्जनानन्दनं वीरं जानकीशोकनाशनम्
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ४

उल्लङ्घ्य सिन्धोः सलिलं सलीलम्
यः शोकवह्निं जनकात्मजायाः
आदाय तेनैव ददाह लङ्काम्
नमामि तं प्राञ्जलिराञ्जनेयम् ५

मनोजवं मारुततुल्यवेगम्
जितेन्द्रियं बुद्धिमतां वरिष्ठम्
वातात्मजं वानरयूथमुख्यम्
श्रीरामदूतं शरणं प्रपद्ये ६

आञ्जनेयमतिपाटलाननम्
काञ्चनाद्रिकमनीय विग्रहम्
पारिजाततरुमूलवासिनम्
भावयामि पवमाननन्दनम् ७

यत्र यत्र रघुनाथकीर्तनम्
तत्र तत्र कृतमस्तकाञ्जलिम्
वाष्पवारिपरिपूर्णलोचनम्
मारुतिं नमते राक्षसान्तकम् ८

Reference:
Henry W. Beck, ed., *Hanuman Jayanti*, (Collegeville, Pennsylvania: Bhavani Charitable Trust, April 24, 2005), p. 24-25.
Verse 1: Ram Charit Manas 1.17. R.C. Prasad, ed., *Tulasīdāsa's Śrī Rāmacaritamānasa: The Holy Lake of the Acts of Rāma,* (Delhi: Motilal Banarsidass, 1991), p. 17.
Verse 2: Ram Charit Manas 5.3, R.C. Prasad, p. 535.